स्मरकूपिका, स्त्री, योनिः। स्मरकूपकशब्दादाप्-प्रत्ययेन निष्पन्ना ॥

स्मरगुरुः, पुं, (स्मरस्य गुरुः पिता। कृष्णावतारे प्रद्युम्नजनकत्वात् तथात्वम्।) विष्णुः। इति केचित् ॥

स्मरगृहं, क्ली, (स्मरस्य गृहम्।) योनिः। इति जटाधरः ॥

स्मरचक्रः, पुं, (स्मरस्य चक्रमिव आकृतिर्यस्य।) रतिबन्धविशेषः। यथा, स्मरदीपिकायाम्।
"धृत्वा वामकरेणोरुं स्वपादस्योपरिस्थितम्।
हृदयं रमते कामी स्मरचक्रप्रकीर्त्तितः ॥"

स्मरच्छत्रं, क्ली, (स्मरस्य छत्रमिव।) योनिः। इति केचित् ॥

स्मरणं, क्ली, (स्मृ + ल्युट्।) स्मृतिः। तत्पर्य्यायः। आध्यानम् २ स्मृतिः ३। इति हेमचन्द्रः ॥ चिन्ता ४ चर्चा ५। इति जटाधरः ॥ (यथा, कुमारे। ६। १८।
"सत्यमर्काच्च सोमाच्च परमध्यास्महे पदम्।
अद्य तूच्चैस्तरं ताभ्यां स्मरणानुग्रहात् तव ॥"
अलङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। ६६८ ॥
"सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते।"
यथा,—
"अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलम्।
स्मरामि वदनं तस्याश्चारु चञ्चललोचनम् ॥"
"मयि सकपटमित्यादौ च" स्मृतेः सादृश्यानुभवं विनोत्थापितत्वान्नायमलङ्कारः। राघवानन्दमहापात्रास्तु वैसादृश्यात् स्मृतिमपि स्मरणालङ्कारमिच्छन्ति। तत्रोदाहरणं तेषामेव यथा,—
"शिरीषमृद्वी गिरिषु प्रपेदे
यदा यदा दुःखशतानि सीता।
तदा तदास्याः सदनेषु सौख्य-
लक्षाणि दध्यौ गलदश्रु रामः ॥"

स्मरणापत्यतर्पकः, पुं, (स्मरणेन अपत्यं तर्पयतीति। तृप् + ण्वुल्।) कच्छपः। इति केचित् ॥

स्मरदशा, स्त्री, (स्मरस्य दशा।) कामावस्था। तद्दशविधा यथा, उज्ज्वलनीलमणिः।
"नयनप्रीतिः प्रथमं चिन्तासङ्गस्ततोऽथ सङ्कल्पः।
निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः।
उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युरित्याचक्षते ॥"

स्मरध्वजं, क्ली, (स्मरस्य ध्वजमिव।) योनिः। इति शब्दरत्नावली ॥

स्मरध्वजः, पुं, (स्मरस्य ध्वज इव।) वाद्यम्। इति हेमचन्द्रः ॥ लिङ्गम्। इति केचित् ॥

स्मरध्वजा, स्त्री, (स्मरस्य ध्वजो गर्व्वो यया) ज्योत्स्नारात्रिः। इति केचित् ॥

स्मरप्रिया, स्त्री, (स्मरस्य प्रिया।) रतिः। इति जटाधरः ॥

स्मरमन्दिरं, क्ली, (स्मरस्य मन्दिरम्।) योनिः। इति हेमचन्द्रः ॥

स्मरलेखनी, स्त्री, (स्मरस्य लेखनीव।) शारिकापक्षी। इति शब्दरत्नावली ॥

स्मरवल्लभः, पुं, (स्मरस्य प्रद्युम्नस्य वल्लभः।) अनिरुद्धः। इति केचित् ॥

स्मरवीथिका, स्त्री, (स्मरस्य वीथिका।) वेश्या। इति राजनिर्घण्टः ॥

स्मरवृद्धिसंज्ञः, पुं, (स्मरस्य वृद्धिर्यस्मात् स स्मरवृद्धिः। स एव संज्ञा यस्य।) कामवृद्धिक्षुपः। इति राजनिर्घण्टः ॥

स्मरसखः, पुं, (स्मरस्य सखा। समासे टच्।) चन्द्रः। इति केचित् ॥ (स्मरस्य उद्दीपके, त्रि। यथा, रघुः। ८। ३६।
"पतिषु निर्व्विविशुर्मधुमङ्गनाः
स्मरसखं रसखण्डनवर्ज्जितम् ॥")

स्मरस्तम्भः, पुं, (स्मरस्य स्तम्भ इव।) उपस्थः। इति शब्दरत्नावली ॥

स्मरसार्थ्यः, पुं, (स्मरः सार्थ्यो यस्य।) गर्द्दभः। इति त्रिकाण्डशेषः ॥

स्मरहरः, पुं, (स्मरं हरति नाशयतीति। हृ + हरतेरनुद्यमने अच्।) शिवः। इत्यमरः। १। १। ३५ ॥

स्मरागारं, क्ली, (स्मरस्य आगारम्।) भगम्। इति शब्दरत्नावली ॥

स्मराङ्कुशः, पुं, (स्मरस्य अङ्कुश इव।) नखम्। इति शब्दरत्नावली ॥

स्मराम्रः, पुं, (स्मरोद्दीपक आम्रः।) राजाम्रः। इति राजनिर्घण्टः ॥

स्मरासवः, पुं, (स्मरस्य आसव इव।) लाला। यथा,—
"स्मरासवो मुखक्षुरं पारि स्यात् पानभाजनम्।"
इति त्रिकाण्डशेषः ॥
मद्यभेदः। इति केचित् ॥

स्मार्त्तं, क्ली, (स्मृतेरिदम्। स्मृति + अण्।) स्मृतिशास्त्रोक्तकर्म्म। यथा,—
"श्रौतं कर्म्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत्।
अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्ततः ॥"
इति तिथ्यादितत्त्वम् ॥
अपि च।
"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी।
अविरोधे सदा कार्य्यं स्मार्त्तं वैदिकवत् सता ॥"
इति श्राद्धतत्त्वम् ॥

स्मार्त्तः, त्रि, (स्मृतेरिदमिति। अण्।) स्मृतिसम्बन्धीयः। (यथा, मनुः। १। १०८।
"आचारः परमो धर्म्मः श्रुत्युक्तः स्मार्त्त एव च।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः ॥")
स्मृतिशास्त्रव्यवसायी। स्मृतिशब्दात् अणप्रत्ययेन निष्पन्नः ॥

स्मि, क ङ अनादरे। इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-अनिट्।) दन्त्यादिः। क ङ, स्माययते। इति दुर्गादासः ॥

स्मिट, क अनादरे। स्नेहे। इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट्।) ओष्ठ्यवर्गशेषयुक्तः। क, स्मेटयति। इति दुर्गादासः ॥

स्मितं, क्ली, (स्मि ङ ईषद्धसनम् + क्तः।) ईषद्धास्यम्। इत्यमरः। १। ७। ३४ ॥ (यथा, महाभारते। १। १५३। २२।
"विलज्जमानेव नता दिव्याभरणभूषिता।
स्मितपूर्व्वमिदं वाक्यं भीमसेनमथाब्रवीत् ॥"
विकसिते, त्रि। इति त्रिकाण्डशेषः ॥ (यथा, माघे। ६। ५४।
"स्मितसरोरुहनेत्रसरोजला-
मतिसिताङ्गविहङ्गहसद्दिवम् ॥")

स्मील, निमेषणे। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट्।) ओष्ठ्यवर्गशेषयुक्तः। स्मीलति चक्षुः पक्ष्मभिराहतं स्यादित्यर्थः। इति दुर्गादासः ॥

स्मृ, स्मृतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-अनिट्।) स्मरति। स्मृतिर्ज्ञानविशेषः। तथा च।
"सम्विज्ज्ञगवती द्वेधा स्मृत्यनुभवभेदिका।"
इति तार्किकाः ॥
तेन णौ अज्ञान्तकर्त्तुः कर्म्मत्वम्। गुरुः शिष्यं शास्त्रं स्मारयति। इति दुर्गादासः ॥

स्मृ, म औत्सुक्ये। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सक० इति केचित्-अनिट्।) म, स्मरयति। उत्कः उत्कण्ठितः तस्य भावः औत्सुक्यमुत्कण्ठा। आध्याने इति प्राञ्चः। आ समन्तात् ध्यानमाध्यानं इति कश्चित्। उत्कण्ठिका इति काशिकावृत्तिवोपदेवौ। उत्कण्ठापूर्व्वकं स्मरणमिति वृद्धाः। मुहुरनुस्मरयन्तमनुस्मयं त्रिपुरदाहमिति किराते। इति दुर्गादासः ॥

स्मृतः, त्रि, (स्मृ + क्तः।) स्मृतिविषयः। कृतस्मरणः। यथा,—
"आब्दिके पितृकृत्ये च मासश्चान्द्रमसः स्मृतः।
विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः ॥"
इति मलमासतत्त्वम् ॥

स्मृतिः, स्त्री, (स्मृ + क्तिन्।) अनुभूतविषयज्ञानम्। इति चण्डीटीकायां नागोजीभट्टः ॥ स्वाम्याश्रितक्रियाजन्यसंस्कारजन्यज्ञानम्। इति रसमञ्जरी ॥ अनुभव-संस्कार-जन्य-ज्ञानम्। यथा,—
"सम्विज्ज्ञगवती द्वेधा स्मृत्यनुभवभेदिका ॥"
इति कविकल्पद्रुमटीकायां दुर्गादासः ॥
किञ्च।
"विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता।
अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्व्विधा ॥"
इति भाषापरिच्छेदः ॥